दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः।१.४३

doṣairethaiḥ kulaghnānāṁ varṇasankarakārakaiḥ ।
utsādyante jātidharmāḥ kuladharmāśca śāśvatāḥ ।।1.43

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम।।१.४४

utsannakuladharmāṇām manuṣyāṇāṁ janārdana ।
narake'niyataṁ vāso bhavatītyanuśuśruma ।।1.44

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः।।१.४५

aho bata mahatpāpaṁ kartuṁ vyavasitā vayam ।
yadrājyasukhalobhena hantuṁ svajanamudyatāḥ ।।1.45

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्।।१.४६

yadi māmapratīkāramaśastraṁ śastrapāṇayaḥ ।
dhārtarāṣtrā raṇe hanyustanme kṣemataraṁ bhavet ।।1.46

संजय उवाच। sañjaya uvāca ।
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्।
विसृज्य सशरं चापं शोकसंविग्नमानसः।।१.४७

evamuktvārjunḥ sankhye rathopastha upāviśat ।
visṛ̆jya saśaraṁ cāpaṁ śokasaṁvignamānsasaḥ ।।1.47

ओम् तत्सत् इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगोनाम
प्रथमोऽध्यायः।।

Om tatsaditi śrīmadbhagavadgītāsūpaniṣatsu brahmavidyāyāṁ
yogaśāstre śrīkriṣṇārjunasaṁvāde-arjunaviṣādayogo nāma
prathamo'dhyāyaḥ ।।